# Shri Vasavi Devi Sahasranama Stotram 2

# श्रीवासविदेवीसहस्रनामस्तोत्रम् २

## Document Information

Text title : Vasavi Kanyaka Parameshvari Sahasranama Stotra 2

File name : vAsavIkanyakAparameshvarIsahasranAmastotram2.itx

Category : devii, sahasranAma, devI

Location : doc_devii

Author : Rajeshwari Govindaraj

Transliterated by : NA

Proofread by : Rajeshwari Govindaraj

Description/comments : Audio rendered by Vidushi Smt Jyothi Aswathanarayan, Smt Ashwini Srikanth and Smt Nandini Vinay

Latest update : July 9, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीवासविदेवीसहस्रनामस्तोत्रम् २

ध्यानम् -
ओङ्कारबीजाक्षरीं ह्रीङ्कारीं श्रीमद्वासवी कन्यकापरमेश्वरीं
घनशैलपुराधीश्वरीं कुसुमाम्बकुसुमश्रेष्ठिप्रियकुमारीम् ।
विरूपाक्षदिव्यसोदरीं अहिंसाज्योतिरूपिणीं कलिकालुष्यहारिणीं
सत्यज्ञानानन्दशरीरिणीं मोक्षपथदर्शिनीं
नादबिन्दुकलातीतजगज्जननीं त्यागशीलव्रतां
नित्यवैभवोपेतां परदेवतां तां नमाम्यहम् सर्वदा ध्यायाम्यहम् ॥

अथ श्रीवासविदेवीसहस्रनामस्तोत्रम् ।

ॐ श्रीवासवी विश्वजननी विश्वलीलाविनोदिनी ।
श्रीमाता विश्वम्भरी वैश्यवंशोद्धारिणी ॥ १॥

कुसुमदम्पतिनन्दिनी कामितार्थप्रदायिनी ।
कामरूपा प्रेमदीपा कामक्रोधविनाशिनी ॥ २॥

पेनुगोण्डक्षेत्रनिलया पराशक्त्यवतारिणी ।
पराविद्या परञ्ज्योतिः देहत्रयनिवासिनी ॥ ३॥

वैशाखशुद्धदशमीभृगुवासरजन्मधारिणी ।
विरूपाक्षप्रियभगिनी विश्वरूपप्रदर्शिनी ॥ ४॥

पुनर्वसुतारायुक्तशुभलग्नावतारिणी ।
प्रणवरूपा प्रणवाकारा जीवकोटिशुभकारिणी ॥ ५॥

त्यागसिंहासनारूढा तापत्रयसुदूरिणी ।
तत्त्वार्थचिन्तनशीला तत्त्वज्ञानप्रबोधिनी ॥ ६॥

अध्यात्मज्ञानविज्ञाननिधिर्महत्साधनाप्रिया ।
अध्यात्मज्ञानविद्यार्थियोगक्षेमवहनप्रिया ॥ ७॥

साधकान्तःकरणमथनी रागद्वेषविदूरिणी ।
सर्वसाधकसञ्जीविनी सर्वदा मोदकारिणी ॥ ८॥

स्वतन्त्रधारिणी रम्या सर्वकालसुपूजिता ।
स्वस्वरूपानन्दमग्ना साधुजनसमुपासिता ॥ ९॥

विद्यादाता सुविख्याता ज्ञानिजनपरिषोषिणी ।
वैराग्योल्लासनप्रीता भक्तशोधनतोषिणी ॥ १०॥

सर्वकार्यसिद्धिदात्री उपासकसङ्कर्षिणी ।
सर्वात्मिका सर्वगता धर्ममार्गप्रदर्शिनी ॥ ११॥

गुणत्रयमयी देवी सुराराध्यासुरान्तका ।
गर्वदूरा प्रेमाधारा सर्वमन्त्रतन्त्रात्मिका ॥ १२॥

विज्ञानतन्त्रसञ्चालितयन्त्रशक्तिविवर्धिनी ।
विज्ञानपूर्णवेदान्तसारामृताभिवर्षिणी ॥ १३॥

भवपङ्कनित्यमग्नसाधकसुखकारिणी ।
भद्रकर्तावेशशमनी त्यागयात्रार्थिपालिनी ॥ १४॥

बुधवन्द्या बुद्धिरूपा कन्याकुमारी श्रीकरी ।
भास्कराचार्याप्तशिष्या मौनव्रतरक्षाकरी ॥ १५॥

काव्यनाट्यगानशिल्पचित्रनटनप्रमोदिनी ।
कायक्लेशभयालस्यनिरोधिनी पथदर्शिनी ॥ १६॥

भावपुष्पार्चनप्रीता सुरासुरपरिपालिनी ।
बाह्यान्तरशुद्धिनिष्ठदेहस्वास्थ्यसंरक्षिणी ॥ १७॥

जन्ममृत्युजराजाड्यायातनापरिहारिणी ।
जीवजीवभेदभावदूरिणी सुममालिनी ॥ १८॥

चतुर्दशभुवनैकाधीश्वरी राजेश्वरी ।
चराचरजगन्नाटकसूत्रधारिणी कलाधरी ॥ १९॥

ज्ञाननिधिः ज्ञानदायी परापराविद्याकरी ।
ज्ञानविज्ञानानुभूतिकारिणी निष्ठाकरी ॥ २०॥

चतुर्वेदज्ञानजननी चतुर्विद्याविनोदिनी ।
चतुष्षष्ठिकलापूर्णा रसिककसुजनाकर्षिणी ॥ २१॥

भूम्याकाशवायुरग्निजलेश्वरी माहेश्वरी ।
भव्यदेवालयप्रतिष्ठितचारुमूर्तिः अभयङ्करी ॥ २२॥

भूतग्रामसृष्टिकर्त्री शक्तिज्ञानप्रदायिनी ।
भोगैश्वर्यदाहहन्त्री नीतिमार्गप्रदर्शिनी ॥ २३॥

दिव्यगात्री दिव्यनेत्री दिव्यचक्षुदा शोभना ।
दिव्यमाल्याम्बरधरी दिव्यगन्धसुलेपना ॥ २४॥

सुवेषालङ्कारप्रीता सुप्रिया प्रभावती ।
सुमतिदाता सुमनत्राता सर्वदा तेजोवती ॥ २५॥

चाक्षुषज्योतिप्रकाशा ओजसज्योतिप्रकाशिनी ।
भास्वरज्योतिप्रज्वलिनी तैजसज्योतिरूपिणी ॥ २६॥

अनुपमानन्दाश्रुकरी अतिलोकसौन्दर्यवती ।
असीमलावण्यवती निस्सीममहिमावती ॥ २७॥

तत्त्वाधारा तत्त्वाकारा तत्त्वमयी सद्रूपिणी ।
तत्त्वासक्ता तत्त्ववेत्ता चिदानन्दस्वरूपिणी ॥ २८॥

आपत्समयसन्त्राता आत्मस्थैर्यप्रदायिनी ।
आत्मज्ञानसम्प्रदाता आत्मबुद्धिप्रचोदिनी ॥ २९॥

जननमरणचक्रनाथा जीवोत्कर्षकारिणी ।
जगद्रूपा जगद्रक्षा जपतपध्यानतोषिणी ॥ ३०॥

पञ्चयज्ञार्चिता वरदा स्वार्थवृक्षकुठारिका ।
पञ्चकोशान्तर्निकेतना पञ्चक्लेशाग्निशामका ॥ ३१॥

त्रिसन्ध्यार्चितगायत्री मानिनी त्रिमलनाशिनी ।
त्रिवासनारहिता सुमती त्रितनुचेतनकारिणी ॥ ३२॥

महावात्सल्यपुष्करिणी शुकपाणी सुभाषिणी ।
महाप्राज्ञबुधरक्षिणी शुकवाणी सुहासिनी ॥ ३३॥

द्युत्तरशतहोमकुण्डदिव्ययज्ञसुप्रेरका ।
ब्रह्मकुण्डादिसुक्षेत्रपरिवेष्टितपीठिका ॥ ३४॥

द्युत्तरशतलिङ्गान्वितज्येष्ठशैलपुरीश्वरी ।

द्युत्तरशतदम्पतीजनानुसृता निरीश्वरी ॥ ३५॥

त्रितापसन्त्रस्तावनी लताङ्गी तमध्वंसिनी ।
त्रिजगद्वन्द्यजननी त्रिदोषापहारिणी ॥ ३६॥

शब्दार्थध्वनितोषिणी काव्यकर्मविनोदिनी ।
शिष्टप्रिया दुष्टदमनी कष्टनष्टविदूरिणी ॥ ३७॥

जाग्रत्स्वप्नसृष्टिलीलामग्नचित्तज्ञानोदया ।
जन्मरोगवैद्योत्तमा सर्वमतकुलवर्णाश्रया ॥ ३८॥

कामपीडितविष्णुवर्धनमोहाक्रोशिनी विरागिणी ।
कृपावर्षिणी विरजा मोहिनी बालयोगिनी ॥ ३९॥

कवीन्द्रवर्णनावेद्या वर्णनातीतरूपिणी ।
कमनीया दयाहृदया कर्मफलप्रदायिनी ॥ ४०॥

शोकमोहाधीनसाधकवृन्दनित्यपरिरक्षिणी ।
षोडशोपचारपूज्या ऊर्ध्वलोकसञ्चारिणी ॥ ४१॥

भीतिभ्रान्तिविनिर्मुक्ता ध्यानगम्या लोकोत्तरा ।
ब्रह्मविष्णुशिवस्वरूपसद्गुरुवचनतत्परा ॥ ४२॥

अवस्थात्रयनिजसाक्षिणी सद्योमुक्तिप्रसादिनी ।
अलौकिकमाधुर्ययुतसूक्तिपीयूषवर्षिणी ॥ ४३॥

धर्मनिष्ठा शीलनिष्ठा धर्माचरणतत्परा ।
दिव्यसङ्कल्पफलदात्री धैर्यस्थैर्यरत्नाकरा ॥ ४४॥

पुत्रकामेष्टियागानुग्रहसत्फलरूपिणी ।
पुत्रमित्रबन्धुमोहदूरिणी मैत्रिमोदिनी ॥ ४५॥

चारुमानुषविग्रहरूपधारिणी सुरागिणी ।
चिन्तामणिगृहवासिनी चिन्ताजाड्यप्रशमनी ॥ ४६॥

जीवकोटिरक्षणपरा विद्वज्ज्योतिप्रकाशिनी ।
जीवभावहरणचतुरा हंसिनी धर्मवादिनी ॥ ४७॥

भक्ष्यभोज्यलेह्यचोष्यनिवेदनसंहर्षिणी ।
भेदरहिता मोदसहिता भवचक्रप्रवर्तिनी ॥ ४८॥

हृदयगुहान्तर्यामिनी सहृदयसुखवर्धिनी ।
हृदयदौर्बल्यविनाशिनी समचित्तप्रसादिनी ॥ ४९॥

दीनाश्रया दीनपूज्या दैन्यभावविवर्जिता ।
दिव्यसाधनसम्प्राप्तदिव्यशक्तिसमन्विता ॥ ५०॥

छलशक्तिदायिनी वन्द्या धीरसाधकोद्धारिणी ।
छलद्वेषवर्जितात्मा योगिमुनिसंरक्षिणी ॥ ५१॥

ब्रह्मचर्याश्रमपरा गृहस्थाश्रममोदिनी ।
वानप्रस्थाश्रमरक्षिणी सन्न्यासाश्रमपावनी ॥ ५२॥

महातपस्विनी शुभदा महापरिवर्तनाकरा ।
महत्वाकाङ्क्षप्रदात्री महाप्राज्ञाजितामरा ॥ ५३॥

योगाग्निशक्तिसम्भूता शोकशामकचन्द्रिका ।
योगमाया कन्या विनुता ज्ञाननौकाधिनायिका ॥ ५४॥

देवर्षिराजर्षिसेव्या दिविजवृन्दसम्पूजिता ।
ब्रह्मर्षिमहर्षिगणगम्या ध्यानयोगसंहर्षिता ॥ ५५॥

उरगहारस्तुतिप्रसन्ना उरगशयनप्रियभगिनी ।
उरगेन्द्रवर्णितमहिमा उरगाकारकुण्डलिनी ॥ ५६॥

परम्परासम्प्राप्तयोगमार्गसञ्चालिनी ।
परानादलोला विमला परधर्मभयदूरिणी ॥ ५७॥

पद्मशयनचक्रवर्तिसुतराजराजेन्द्रश्रिता ।
पञ्चबाणचेष्टदमनी पञ्चबाणसतिप्रार्थिता ॥ ५८॥

सौम्यरूपा मधुरवाणी महाराज्ञी निरामयी ।
सुज्ञानदीपाराधिता समाधिदर्शितचिन्मयी ॥ ५९॥

सकलविद्यापारङ्गता अध्यात्मविद्याकोविदा ।
सर्वकलाध्येयान्विता श्रीविद्याविशारदा ॥ ६०॥

ज्ञानदर्पणात्मद्रष्टा कर्मयोगिद्रव्यार्चिता ।
यज्ञशिष्टाशिनपावनी यज्ञतपोऽनवकुण्ठिता ॥ ६१॥

सृजनात्मकशक्तिमूला काव्यवाचनविनोदिनी ।
रचनात्मकशक्तिदाता भवननिकेतनशोभिनी ॥ ६२॥

ममताहङ्कारपाशविमोचनी धृतिदायिनी ।
महाजनसमावेष्टितकुसुमश्रेष्ठिहितवादिनी ॥ ६३॥

स्वजनानुमोदसहितत्यागक्रान्तियोजनकरी ।
स्वधर्मनिष्ठासिध्यर्थकृतकर्मशुभङ्करी ॥ ६४॥

कुलबान्धवजनाराध्या परन्धामनिवासिनी ।
कुलपावनकरत्यागयोगदर्शिनी प्रियवादिनी ॥ ६५॥

धर्मजिज्ञासानुमोदिन्यात्मदर्शनभाग्योदया ।
धर्मप्रिया जया विजया कर्मनिरतज्ञानोदया ॥ ६६॥

नित्यानन्दासनासीना शक्तिभक्तिवरदायिनी ।
निग्रहापरिग्रहशीला आत्मनिष्ठाकारिणी ॥ ६७॥

तारतम्यभेदरहिता सत्यसन्धा नित्यव्रता ।
त्रैलोक्यकुटुम्बमाता सम्यग्दर्शनसंयुता ॥ ६८॥

अहिंसाव्रतदीक्षायुता लोककण्टकदैत्यापहा ।
अल्पज्ञानापायहारिणी अर्थसञ्चयलोभापहा ॥ ६९॥

प्रेमप्रीता प्रेमसहिता निष्कामसेवाप्रिया ।
प्रेमसुधाम्बुधिलीनभक्तचित्तनित्यालया ॥ ७०॥

मोघाशादुःखदायी अमोघज्ञानदायिनी ।
महाजनबुद्धिभेदजनकबोधक्रमवारिणी ॥ ७१॥

सात्त्विकान्तःकरणवासा राजसहृत्क्षोभिणी ।
तामसजनशिक्षणेष्टा गुणातीता गुणशालिनी ॥ ७२॥

गौरवबालिकावृन्दनायिका षोडशकलात्मिका ।
गुरुशुश्रूषापरायणनित्यध्येया त्रिगुणात्मिका ॥ ७३॥

जिज्ञासातिशयज्ञाता अज्ञानतमोनाशिनी ।
विज्ञानशास्त्रातीता ज्ञातृज्ञेयस्वरूपिणी ॥ ७४॥

सर्वाधिदेवताजननी नैष्कर्म्यसिद्धिकारिणी ।
सर्वाभीष्टदा सुनयनी नैपुण्यवरदायिनी ॥ ७५॥

गुणकर्मविभागानुसारवर्णविधायिनी ।

गुरुकारुण्यप्रहर्षिता नलिनमुखी निरञ्जनी ॥ ७६॥

जातिमतद्वेषदूरा मनुजकुलहितकामिनी ।
ज्योतिर्मयी जीवदायी प्रज्ञाज्योतिस्वरूपिणी ॥ ७७॥

कर्मयोगमर्मवेत्ता भक्तियोगसमुपाश्रिता ।
ज्ञानयोगप्रीतचित्ता ध्यानयोगसुदर्शिता ॥ ७८॥

स्वात्मार्पणसन्तुष्टा शरणभृङ्गसुसेविता ।
स्वर्णवर्णा सुचरितार्था करणसङ्गत्यागव्रता ॥ ७९॥

आद्यन्तरहिताकारा अध्ययनलग्नमानसा ।
असदृशमहिमोपेता अभयहस्ता मृदुमानसा ॥ ८०॥

उत्तमोत्तमगुणाःपूर्णा उत्सवोल्लासरञ्जनी ।
उदारतनुविच्छिन्नप्रसुप्तसंस्कारतारिणी ॥ ८१॥

गुणग्रहणाभ्यासमूला एकान्तचिन्तनप्रिया ।
गहनब्रह्मतत्त्वलोला एकाकिनी स्तोत्रप्रिया ॥ ८२॥

वसुधाकुटुम्बरक्षिणी सत्यरूपा महामतिः ।
वर्णशिल्पिनी निर्भवा भुवनमङ्गलाकृतिः ॥ ८३॥

शुद्धबुद्धिस्वयंवेद्या शुद्धचित्तसुगोचरा ।
शुद्धकर्माचरणनिष्ठसुप्रसन्ना बिम्बाधरा ॥ ८४॥

नवग्रहशक्तिदा गूढतत्त्वप्रतिपादिनी ।
नवनवानुभावोदया विश्वज्ञा श्रुतिरूपिणी ॥ ८५॥

आनुमानिकगुणातीता सुसन्देशबोधाम्बुधिः ।
आनृण्यजीवनदात्री ज्ञानैश्वर्यमहानिधिः ॥ ८६॥

वाग्वैखरीसंयुक्ता दयासुधाभिवर्षिणी ।
वाग्रूपिणी वाग्विलासा वाक्पटुत्वप्रदायिनी ॥ ८७॥

इन्द्रचापसदृशभूः दाडिमीद्विजशोभिनी ।
इन्द्रियनिग्रहछलदा सुशीला स्तवरागिणी ॥ ८८॥

षट्चक्रान्तरालस्था अरविन्ददललोचना ।
षड्वैरिदमनबलदा माधुरी मधुरानना ॥ ८९॥

अतिथिसेवापरायणधनधान्यविवर्धिनी ।
अकृत्रिममैत्रिलोला वैष्णवी शास्त्ररूपिणी ॥ ९०॥

मन्त्रक्रियातपोभक्तिसहितार्चनाह्लादिनी ।
मल्लिकासुगन्धराजसुममालिनी सुरभिरूपिणी ॥ ९१॥

कदनप्रियदुष्टमर्दिनी वन्दारुजनवत्सला ।
कलहाक्रोशनिवारिणी खिन्ननाथा निर्मला ॥ ९२॥

अङ्गपूजाप्रियद्युतिवर्धिनी पावनपदद्वयी ।
अनायकैकनायिका लतासदृशभुजद्वये ॥ ९३॥

शृतिलयबद्दगानज्ञा छन्दोबद्धकाव्याश्रया ।
शृतिस्मृतिपुराणेतिहाससारसुधाव्यया ॥ ९४॥

उत्तमाधमभेददूरा भास्कराचार्यसन्नुता ।
उपनयनसंस्कारपरा स्वस्था महात्मवर्णिता ॥ ९५॥

षड्विकारोपेतदेहमोहहरा सुकेशिनी ।
षडैश्वर्यवती ज्यैष्ठा निर्द्वन्द्वा द्वन्द्वहारिणी ॥ ९६॥

दुःखसंयोगवियोगयोगाभ्यासानुरागिणी ।
दुर्व्यसनदुराचारदूरिणी कौसुम्भिनन्दिनी ॥ ९७॥

मृत्युविजयकातरासुरशिक्षकी शिष्टरक्षकी ।
मायापूर्णविश्वकर्त्री निवृत्तिपथदर्शकी ॥ ९८॥

प्रवृत्तिपथनिर्देशकी पञ्चविषयस्वरूपिणी ।
पञ्चभूतात्मिका श्रेष्ठा तपोनन्दनचारिणी ॥ ९९॥

चतुर्युक्तिचमत्कारा राजप्रासादनिकेतना ।
चराचरविश्वाधारा भक्तिसदना क्षमाघना ॥ १००॥

किङ्कर्तव्यमूढसुजनोद्धारिणी कर्मचोदिनी ।
कर्माकर्मविकर्मानुसारबुद्धिप्रदायिनी ॥ १०१॥

नवविधभक्तिसम्भाव्या नवद्वारपुरवासिनी ।
नवरात्यार्चनप्रीता जगद्धात्री सनातनी ॥ १०२॥

विषसममादकद्रव्यसेवनार्थिभयङ्करी ।
विवेकवैराग्ययुक्ता ह्रीङ्कारकल्पतरुवल्लरी ॥ १०३॥

निमन्त्रणनियन्त्रणकुशला प्रीतियुक्तश्रमहारिणी ।
निश्चिन्तमानसोपेता क्रियातन्त्रप्रबोधिनी ॥ १०४॥

रसिकरञ्जककलाह्लादा शीलराहित्यद्वेषिणी ।
त्रिलोकसाम्राज्ञी स्फुरणशक्तिसंवर्धिनी ॥ १०५॥

चित्तस्थैर्यकरी महेशी शाश्वती नवरसात्मिका ।
चतुरन्तःकरणज्योतिरूपिणी तत्त्वाधिका ॥ १०६॥

सर्वकालाद्वैतरूपा शुद्धचित्तप्रसादिनी ।
सर्वावस्थान्तर्साक्षिणी परमार्थसन्न्यासिनी ॥ १०७॥

आबालगोपसमर्चिता हृत्सरोवरहंसिका ।
अदम्यलोकहितनिरता जङ्गमस्थवरात्मिका ॥ १०८॥

ह्रीङ्कारजपसुप्रीता दीनमाताधीनेन्द्रिया ।
ह्रीमयी दयाधना आर्यवैश्ययशोदया ॥ १०९॥

स्थितप्रज्ञा विगतस्पृहा पराविद्यास्वरूपिणी ।
सर्वावस्थास्मरणप्रदा सगुणनिर्गुणरूपिणी ॥ ११०॥

अष्टैश्वर्यसुखदात्री कृतपुण्यफलदायिनी ।
अष्टकष्टनष्टहन्त्री भक्तिभावतरङ्गिणी ॥ १११॥

ऋणमुक्तदानप्रिया ब्रह्मविद्या ज्ञानेश्वरी ।
पूर्णत्वाकाङ्क्षिसम्भाव्या तपोदानयज्ञेश्वरी ॥ ११२॥

त्रिमूर्तिरूपसद्गुरुभक्तिनिष्ठा ब्रह्माकृतिः ।
त्रितनुबन्धपरिपालिनी सत्यशिवसुन्दराकृतिः ॥ ११३॥

अस्त्रमन्त्ररहस्यज्ञा भैरवी शस्त्रवर्षिणी ।
अतीन्द्रियशक्तिप्रपूर्णा उपासकबलवर्धिनी ॥ ११४॥

अङ्गन्यासकरन्यासससहितपारायणप्रिया ।
आर्षसंस्कृतिसंरक्षणव्रताश्रया महाभया ॥ ११५॥

साकारा निराकारा सर्वानन्दप्रदायिनी ।
सुप्रसन्ना चारुहासा नारीस्वातन्त्र्यरक्षिणी ॥ ११६॥

निस्वार्थसेवासन्निहिता कीर्तिसम्पत्पदायिनी ।

निरालम्बा निरुपाधिका निराभरणभूषिणी ॥ ११७॥

पञ्चक्लेशाधीनसाधकरक्षणशिक्षणतत्परा ।
पाञ्चभौतिकजगन्मूला अनन्यभक्तिसुगोचरा ॥ ११८॥

पञ्चज्ञानेन्द्रियभाव्या परात्परा परदेवता ।
पञ्चकर्मेन्द्रियबलदा कन्यका सुगुणसुमार्चिता ॥ ११९॥

चिन्तनव्रता मन्थनरता अवाङ्मानसगोचरा ।
चिन्ताहारिणी चित्प्रभा सप्तर्षिध्यानगोचरा ॥ १२०॥

हरिहरब्रह्मप्रसूः जननमरणविवर्जिता ।
हासस्पन्दनलग्नमानसस्नेहभावसम्भाविता ॥ १२१॥

पद्मवेदवरदाभयमुद्राधारिणी श्रितावनी ।
परार्थविनियुक्तबलदा ज्ञानभिक्षाप्रदायिनी ॥ १२२॥

विनता सङ्कल्पयुता अमला विकल्पवर्जिता ।
वैराग्यज्ञानविज्ञानसम्पद्दानविराजिता ॥ १२३॥

स्त्रीभूमिसुवर्णदाहतप्तोपरतिशमापहा ।
सामरस्यसंहर्षिता सरसविरससमदृष्टिदा ॥ १२४॥

ज्ञानवह्निदग्धकर्मब्रह्मसंस्पर्शकारिणी ।
ज्ञानयोगकर्मयोगनिष्ठाद्वयसमदर्शिनी ॥ १२५॥

महाधन्या कीर्तिकन्या कार्यकारणरूपिणी ।
महामाया महामान्या निर्विकारस्वरूपिणी ॥ १२६॥

निन्दास्तुतिलाभनष्टसमदर्शित्वप्रदायिनी ।
निर्ममा मनीषिणी सप्तधातुसंयोजनी ॥ १२७॥

नित्यपुष्टा नित्यतुष्टा मैत्रिबन्धोल्लासिनी ।
नित्यैश्वर्या नित्यभोगा स्वाध्यायप्रोल्लासिनी ॥ १२८॥

प्रारब्दसञ्चितागामीकर्मराशिदहनकरी ।
प्रातःस्मरणीयानुत्तमा फणिवेणी कनकाम्बरी ॥ १२९॥

सप्तधातुर्मयशरीररचनकुशला निष्कला ।
सप्तमातृकाजनयित्री निरपाया निस्तुला ॥ १३०॥

इन्द्रियचाञ्चल्यदूरा जितात्मा ब्रह्मचारिणी ।
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनियन्त्रिणी ॥ १३१॥

धर्मावलम्बनमुदिता धर्मकार्यप्रचोदिनी ।
द्वेषरहिता द्वेषदूरा धर्माधर्मविवेचनी ॥ १३२॥

ऋतशक्तिः ऋतुपरिवर्तिनी भुवनसुन्दरी शीतला ।
ऋषिगणसेविताङ्गी ललितकलावनकोकिला ॥ १३३॥

सर्वसिद्धसाध्याराध्या मोक्षरूपा वाग्देवता ।
सर्वस्वरवर्णमाला समस्तभाषाधिदेवता ॥ १३४॥

वामपथगामीसाधकहिंसाहारिणी नन्दिता ।
दक्षिणपथगामीसाधकदयागुणपरिसेविता ॥ १३५॥

नामपारायणतुष्टा आत्मबलविवर्धिनी ।
नादजननी नादलोला दशनादमुददायिनी ॥ १३६॥

शास्त्रोक्तविधिपरिपालिनी भक्तिभुक्तिपथदर्शिनी ।
शास्त्रप्रमाणानुसारिणी शाम्भवी ब्रह्मवादिनी ॥ १३७॥

श्रवणमनननिधिध्यासनिरतसन्निहिताजरा ।
श्रीकान्तब्रह्मशिवरूपा भुवनैकदीपाङ्कुरा ॥ १३८॥

विद्वज्जनधीप्रकाशा सप्तलोकसञ्चारिणी ।
विद्वन्मणी द्युतिमती दिव्यस्फुरणसौधामिनी ॥ १३९॥

विद्यावर्धिनी रसज्ञा विशुद्धात्मासेवार्चिता ।
ज्ञानवर्धिनी सर्वज्ञा सर्वविद्याक्षेत्राश्रिता ॥ १४०॥

विधेयात्यायोगमार्गदर्शिनी धृतिवर्धिनी ।
विविधयज्ञदानतपोकारिणी पुण्यवर्धिनी ॥ १४१॥

अनन्यभक्तिक्षिप्रवश्या उदयभानुकोटिप्रभा ।
अष्टाङ्गयोगानुरक्ता अद्वैता स्वयम्प्रभा ॥ १४२॥

गोष्ठिप्रिया वैरजडताहारिणी विनतावनी ।
गुह्यतमसमाधिमग्नयोगिराजसम्भाषिणी ॥ १४३॥

सर्वलोकसम्भाविता सदाचारप्रवर्तिनी ।
सर्वपुण्यतीर्थात्मिका सत्कर्मफलदायिनी ॥ १४४॥

कर्तृतन्त्रपूजाश्रिता वस्तुतन्त्रतत्त्वात्मिका ।
करणत्रयशुद्धिप्रदा सर्वभूतव्यूहाम्बिका ॥ १४५॥

मोहालस्यदीर्घसूत्रतापहा सत्त्वप्रदा ।
मानसाश्ववेगरहितजपयज्ञमोदास्पदा ॥ १४६॥

जाग्रत्स्वप्नसुषुप्तिस्था विश्वतैजसप्राज्ञात्मिका ।
जीवन्मुक्तिप्रसादिनी तुरीया सार्वकालिका ॥ १४७॥

शब्दस्पर्शरूपगन्धरसविषयपञ्चकव्यापिनी ।
सोहंमन्त्रयुतोच्छ्वासनिश्वासानन्दरूपिणी ॥ १४८॥

भूतभविष्यद्वर्तमानज्ञा पुराणी विश्वाधिका ।
ब्राह्मीस्थितिप्राप्तिकरी आत्मरूपाभिज्ञापका ॥ १४९॥

योगिजनपर्युपास्या अपरोक्षज्ञानोदया ।
यक्षकिम्पुरुषसम्भाव्या विशृङ्खला धर्मालया ॥ १५०॥

अस्वस्थदेहिसंस्मरणप्रसन्ना वरदायिनी ।
अस्वस्थचित्तशान्तिदायी समत्वबुद्धिवरदायिनी ॥ १५१॥

प्रासानुप्रासविनोदिनी सृजनकर्मविलासिनी ।
पञ्चतन्मात्राजननी कल्पनासुविहारिणी ॥ १५२॥

ओङ्कारनादानुसन्धाननिष्ठाकरी प्रतिभान्विता ।
ओङ्कारबीजाक्षररूपा मनोलयप्रहर्षिता ॥ १५३॥

ध्यानजाह्नवी वणिक्कन्या महापातकध्वंसिनी ।
दुर्लभा पतितोद्धारा साध्यमौल्यप्रबोधिनी ॥ १५४॥

वचनमधुरा हृदयमधुरा वचनवेगनियन्त्रिणी ।
वचननिष्ठा भक्तिजुष्टा तृप्तिधामनिवासिनी ॥ १५५॥

नाभिहृत्कण्ठसदना अगोचरनादरूपिणी ।
परानादस्वरूपिणी वैखरीवाग्रञ्जिनी ॥ १५६॥

आर्द्रा आन्ध्रावनिजाता गोप्या गोविन्दभगिनी ।
अश्विनीदेवताराध्या अश्वत्ततरुरूपिणी ॥ १५७॥

प्रत्यक्षपराशक्तिमूर्तिः भक्तस्मरणतोषिणी ।

पट्टाभिषिक्तविरूपाक्षत्यागव्रतप्रहर्षिणी ॥ १५८॥

ललिताश्रितकामधेनुः अरुणचरणकमलद्वयी ।
लोकसेवापरायणसंरक्षिणी तेजोमयी ॥ १५९॥

नगरेश्वरदेवालयप्रतिष्ठिता नित्यार्चिता ।
नवावरणचक्रेश्वरी योगमायाकन्यानुता ॥ १६०॥

नन्दगोपपुत्री दुर्गा कीर्तिकन्या कन्यामणी ।
निखिलभुवनसम्मोहिनी सोमदत्तप्रियनन्दिनी ॥ १६१॥

समाधिमुनिसम्प्रार्थितसपरिवारमुक्तिदायिनी ।
सामन्तराजकुसुमश्रेष्ठिपुत्रिका धीशालिनी ॥ १६२॥

प्राभातसगोत्रजाता उद्वाहुवंशपावनी ।
प्रज्ञाप्रमोदप्रगुणदायिनी गुणशोभिनी ॥ १६३॥

सालङ्कायनऋषिस्तुता सच्चारित्र्यसुदीपिका ।
सद्भक्तमणिगुप्तादिवैश्यवृन्दहृच्चन्द्रिका ॥ १६४॥

गोलोकनायिका देवी गोमठान्वयरक्षिणी ।
गोकर्णनिर्गतासमस्तवैश्यऋषिक्षेमकारिणी ॥ १६५॥

अष्टादशनगरस्वामिगणपूज्यपरमेश्वरी ।
अष्टादशनगरकेन्द्रपञ्चक्रोशनगरेश्वरी ॥ १६६॥

आकाशवाण्युक्ता“वासवी”कन्यकानामकीर्तिता ।
अष्टादशशक्तिपीठरूपिणी यशोदासुता ॥ १६७॥

कुण्डनिर्मातृमल्हरवह्निप्रवेशानुमतिप्रदा ।
कर्मवीरलाभश्रेष्ठि-अग्निप्रवेशानुज्ञाप्रदा ॥ १६८॥

सेनानिविक्रमकेसरिदुर्बुद्दिपरिवर्तिनी ।
सैन्याधिपतिवंशजवीरमुष्टिसम्पोषिणी ॥ १६९॥

तपोव्रतराजराजेन्द्रभक्तिनिष्ठासाफल्यदा ।
तप्तविष्णुवर्धननृपमोहदूरा मुक्तिप्रदा ॥ १७०॥

महावक्ता महाशक्ता पराभवदुःखापहा ।
मूढश्रद्धापहारिणी संशयात्मिकबुद्ध्यापहा ॥ १७१॥

दृश्यादृश्यरूपधारिणी यतदेहवाङ्मानसा ।
दैवीसम्पत्प्रदात्री दर्शनीया दिव्यचेतसा ॥ १७२॥

योगभ्रष्टसमुद्धरणविशारदा निजमोददा ।
यमनियमासनप्राणायामनिष्ठशक्तिप्रदा ॥ १७३॥

धारणध्यानसमाधिरतशोकमोहविदूरिणी ।
दिव्यजीवनान्तर्ज्योतिप्रकाशिनी यशस्विनी ॥ १७४॥

योगीश्वरी यागप्रिया जीवेश्वरस्वरूपिणी ।
योगेश्वरी शुभ्रज्योत्स्ना उन्मत्तजनपावनी ॥ १७५॥

लयविक्षेपसकषायरसास्वादातीताजिता ।
लोकसङ्ग्रहकार्यरता सर्वमन्त्राधिदेवता ॥ १७६॥

विचित्रयोगानुभवदा अपराजिता सुस्मिता ।
विस्मयकरशक्तिप्रदा द्रव्ययज्ञनित्यार्चिता ॥ १७७॥

आत्मसंयमयज्ञकरी असङ्गशस्त्रदायिनी ।
अन्तर्मुखसुलभवेद्या तल्लीनताप्रदायिनी ॥ १७८॥

धर्मार्थकाममोक्षचतुर्पुरुषार्थसाधना ।
दुःखनष्टापजयव्याजमनोदौर्बल्यवारणा ॥ १७९॥

वचनवस्त्रप्रीतहृदया जन्मधैर्यप्रकाशिनी ।
व्याधिग्रस्तकठिणचित्तकारुण्यरसवाहिनी ॥ १८०॥

चित्प्रकाशलाभदायी धेयमूर्तिः ध्यानसाक्षिणी ।
चारुवदना यशोदायी पञ्चवृत्तिनिरोधिनी ॥ १८१॥

लोकक्षयकारकास्त्रशक्तिसञ्चयमारका ।
लोकबन्धनमोक्षार्थिनित्यक्लिष्टपरीक्षका ॥ १८२॥

सूक्ष्मसंवेदनाशीला चिरशान्तिनिकेतना ।
सूक्ष्मग्रहणशक्तिमूला पञ्चप्राणान्तर्चेतना ॥ १८३॥

प्रयोगसहितज्ञानज्ञा सम्मूढसमुद्धारिणी ।
प्राणव्यापारसदाधीनभीत्याकुलपरिरक्षिणी ॥ १८४॥

दैवासुरसम्पद्विभागपण्डिता लोकशासका ।
देवसद्गुरुसाधुदूषकसन्मार्गप्रवर्तिका ॥ १८५॥

पश्चात्तापतप्तसुखदा जीवधर्मप्रचारिणी ।
प्रायश्चित्तकृतितोषिता कीर्तिकारककृतिहर्षिणी ॥ १८६ ॥

गृहकृत्यलग्नसाधकस्मरणमात्रप्रमुदिता ।
गृहस्थजीवनद्रष्टा सेवायुतसुधीर्विदिता ॥ १८७॥

संयमीमुनिसन्दृश्या ब्रह्मनिर्वाणरूपिणी ।
सुदुर्दर्शा विश्वत्राता क्षेत्रक्षेत्रज्ञपालिनी ॥ १८८॥

वेदसाहित्यकलानिधिः ऋग्वेदजातवैश्यजननी ।
वैश्यवर्णमूलगुरु-अपरार्कस्तवमोदिनी ॥ १८९॥

रागनिधिः स्वरशक्तिः भावलोकविहारिणी ।
रागलोला रागरहिता अङ्गरागसुलेपिनी ॥ १९०॥

ब्रह्मग्रन्थिविष्णुग्रन्थिरुद्रग्रन्थिविभेदिनी ।
भक्तिसाम्राज्यस्थापिनी श्रद्धाभक्तिसंवर्धिनी ॥ १९१॥

हंसगमना तितिक्षासना सर्वजीवोत्कर्षिणी ।
हिंसाकृत्यसर्वदाघ्नी सर्वद्वन्द्वविमोचनी ॥ १९२॥

विकृतिमयविश्वरक्षिणी त्रिगुणक्रीडाधामेश्वरी ।
विविक्तसेव्यानिरुद्धा चतुर्दशलोकेश्वरी ॥ १९३॥

भवचक्रव्यूहरचनविशारदा लीलामयी ।
भक्तोन्नतिपथनिर्देशनकोविदा हिरण्मयी ॥ १९४॥

भगवद्दर्शनार्थपरिश्रमानुकूलदायिनी ।
बुद्धिव्यवसायवीक्षणी देदीप्यमानरूपिणी ॥ १९५॥

बुद्धिप्रधानशास्त्रज्योतिः महाज्योतिः महोदया ।
भावप्रधानकाव्यगेया मनोज्योतिः दिव्याश्रया ॥ १९६॥

अमृतसमसूक्तिसरिता पञ्चऋणविवर्जिता ।
आत्मसिंहासनोपविष्टा सुदती धीमन्ताश्रिता ॥ १९७॥

सुषुम्नानाडिगामिनी रोमहर्षस्वेदकारिणी ।
स्पर्शज्योतिशब्दद्वाराब्रह्मसंस्पर्शकारिणी ॥ १९८॥

बीजाक्षरीमन्त्रनिहिता निग्रहशक्तिवर्धिनी ।

ब्रह्मनिष्ठरूपव्यक्ता ज्ञानपरिपाकसाक्षिणी ॥ १९९॥

अकाराख्या उकारेज्या मकारोपास्योज्ज्वला ।
अचिन्त्याऽपरिच्छेद्या एकभक्तिःहृतप्रज्ज्वला ॥ २००॥

अशोष्या मृत्युञ्जया देशसेवकनित्याश्रया ।
अक्लेद्या नव्याच्छेद्या आत्मज्योतिप्रभोदया ॥ २०१॥

दयागङ्गाधरा धीरा गीतसुधापानमोदिनी ।
दर्पणोपममृदुकपोला चारुचुबुकविराजिनी ॥ २०२॥

नवरसमयकलातृप्ता शास्त्रातीतलीलाकरी ।
नयनाकर्षकचम्पकनासिका सुमनोहरी ॥ २०३॥

लक्षणशास्त्रमहावेत्ता विरूपभक्तवरप्रदा ।
ज्योतिष्शास्त्रमर्मवेत्ता नवग्रहशक्तिप्रदा ॥ २०४॥

अनङ्गभस्मसञ्जातभण्डासुरमर्दिनी ।
आन्दोलिकोल्लासिनी महिषासुरमर्दिनी ॥ २०५॥

भण्डासुररूपचित्रकण्ठगन्धर्वध्वंसिनी ।
भ्रात्रार्चिता विश्वख्याता प्रमुदिता स्फुरद्रूपिणी ॥ २०६॥

कीर्तिसम्पत्प्रदा उत्सवसम्भ्रमहर्षिणी ।
कर्तृत्वभावरहिता भोक्तृभावसुदूरिणी ॥ २०७॥

नवरत्नखचितहेममकुटधरी गोरक्षिणी ।
नवऋषिजननी शान्ता नव्यमार्गप्रदर्शिनी ॥ २०८॥

विविधरूपवर्णसहितप्रकृतिसौन्दर्यप्रिया ।
वामगात्री नीलवेणी कृषिवाणिज्यमहाश्रया ॥ २०९॥

कुङ्कुमतिलकाङ्कितललाटा वज्रनासाभरणभूषिता ।
कदम्बाटवीनिलया कमलकुड्मलकरशोभिता ॥ २१०॥

योगिहृत्कवाटपाटना चतुरादम्मचेतना ।
योगयात्रार्थिस्फूर्तिदा षड्दर्शनसम्प्रेरणा ॥ २११॥

अन्धभक्तनेत्रदात्री अन्धभक्तिसुदूरिणी ।
मूकभक्तवाक्प्रदा भक्तिमहिमोत्कर्षिणी ॥ २१२॥

पराभक्तसेवितविषहारिणी सञ्जीविनी ।
पुरजनौघपरिवेष्टिता स्वात्मार्पणपथगामिनी ॥ २१३॥

भवान्यनावृष्टिव्याजजलमौल्यप्रबोधिका ।
भयानकातिवृष्टिव्याजजलशक्तिप्रदर्शिका ॥ २१४॥

रामायणमहाभारतपञ्चाङ्गश्रवणप्रिया ।
रागोपेतकाव्यनन्दिता भागवत्कथाप्रिया ॥ २१५॥

धर्मसङ्कटपरम्पराशुहारिणी मधुरस्वरा ।
धीरोदात्ता माननीया ध्रुवा पल्लवाधरा ॥ २१६॥

परापराप्रकृतिरूपा प्राज्ञपामरमुदालया ।
पञ्चकोशाध्यक्षासना प्राणसञ्चारसुखाश्रया ॥ २१७॥

शताशापाशसम्बद्धदुष्टजनपरिवर्तिनी ।
शतावधानीधीज्योतिप्रकाशिनी भवतारिणी ॥ २१८॥

सर्ववस्तुसृष्टिकारणान्तर्मर्मवेत्ताम्बिका ।
स्थूलबुद्धिदुर्विज्ञेया सृष्टिनियमप्रकाशिका ॥ २१९॥

नामाकारोद्देशसहितस्थूलसूक्ष्मसृष्टिपालिनी ।
नाममन्त्रजपयज्ञसद्योसाफल्यदायिनी ॥ २२०॥

आत्मतेजोंशसम्भवाचार्योपासनसुप्रिया ।
आचार्याभिगामिशुभकारिणी निराश्रया ॥ २२१॥

क्षुत्तृषानिद्रामैथुनविसर्जनधर्मकारिणी ।
क्षयवृद्धिपूर्णद्रव्यसञ्चयाशाविदूरिणी ॥ २२२॥

नवजातशिशुसंपोषकक्षीरसुधासूषणा ।
नवभावलहर्योदया ओजोवती विचक्षणा ॥ २२३॥

धर्मश्रेष्ठिसुपुत्रार्थकृततपोसाफल्यदा ।
धर्मनन्दननामभक्तसमाराधिता मोददा ॥ २२४॥

धर्मनन्दनप्रियाचार्यच्च्यवनऋषिसम्पूजिता ।
धर्मनन्दनरसातललोकगमनकारिणी ॥ २२५॥

आङ्गीरसरक्षकार्यकचूडामणिसूनुरक्षिणी ।
आदिशेषबोधलग्नधर्मनन्दनगुप्तावनी ॥ २२६॥

वीणावादनतल्लीना स्नेहबान्धव्यरागिणी ।
वज्रकर्णकुण्डलधरी प्रेमभावप्रोल्लासिनी ॥ २२७॥

श्रीकारी श्रितपारिजाता वेणुनादानुरागिणी ।
श्रीप्रदा शास्त्राधारा नादस्वरनादरञ्जनी ॥ २२८॥

विविधविभूतिरूपधरी मणिकुण्डलशोभिनी ।
विपरीतनिमित्तक्षोभितस्थैर्यधैर्योद्दीपिनी ॥ २२९॥

संवित्सागरी मनोन्मणी सर्वदेशकालात्मिका ।
सर्वजीवात्मिका श्रीनिधिः अध्यात्मकल्पलतिका ॥ २३०॥

अखण्डरूपा सनातनी आदिपराशक्तिदेवता ।
अभूतपूर्वसुचरिता आदिमध्यान्तरहिता ॥ २३१॥

समस्तोपनिषत्सारा समाध्यवस्थान्तर्गता ।
सङ्कल्पयुतयोगवित्तमध्यानावस्थाप्रकटिता ॥ २३२॥

आगमशास्त्रमहावेत्ता सगुणसाकारपूजिता ।
अन्नमयकोशाभिव्यक्ता वैश्वानरनिवेदिता ॥ २३३॥

प्राणमयकोशचालिनी देहत्रयपरिपालिनी ।
प्राणव्यापारनियन्त्रिणी धनऋणशक्तिनियोजनी ॥ २३४॥

मनोमयकोशसञ्चारिणी दशेन्द्रियबुद्धिव्यापिनी ।
विज्ञानमयकोशवासिनी व्यष्टिसमष्टिभेदप्रदर्शिनी ॥ २३५॥

आनन्दमयकोशवासिनी चित्ताहङ्कारनियन्त्रिणी ।
अनन्तवृत्तिधारासाक्षिणी वासनात्रयनाशिनी ॥ २३६॥

निर्दोषा प्रज्ञानम्ब्रह्ममहावाक्यश्रवणालया ।
निर्वैरा तत्त्वमसीतिगुरुवाक्यमननाश्रया ॥ २३७॥

अयमात्माब्रह्मेतिमहावाक्यार्थप्रबोधिनी ।
अहम्ब्रह्मास्मिस्वानुभवाधिष्टात्री दिव्यलोचनी ॥ २३८॥

अव्याहतस्फूर्तिस्रोता नित्यजीवनसाक्षिणी ।
अव्याजकृपासिन्धुः आत्मब्रह्मैक्यकारिणी ॥ २३९॥

फलश्रुतिः -

पूर्वदिगभिमुखोपास्का सर्वसम्पत्वदायिनी ।
पश्चिमाभिमुखाराध्या रोगदुःखनिवारिणी ॥ १॥

उत्तराभिमुखोपास्या ज्ञानरत्नप्रदायिनी ।
दक्षिणाभिमुखाराध्या कामितार्थप्रदायिनी ॥ २॥

मूलाधारचक्रसेव्या ज्ञानारोग्यप्रदायिनी ।
स्वाधिष्ठानाम्बुजेष्या काव्ययोगवरदायिनी ॥ ३॥

मणिपूरजलरुहार्चिता विज्ञानशक्तिविवर्धिनी ।
अनाहताब्दसिंहासना प्रभुत्वविवेकप्रदायिनी ॥ ४॥

विशुद्धचक्रनित्यधेया वाक्यक्तिज्ञानदायिनी ।
विषयोन्मुखत्वापहा क्षत्नपानियन्त्रिणी ॥ ५॥

आज्ञाचक्रनिकेतना शब्दविजयप्रदायिनी ।
सहस्रारान्तराराध्या मुदरूपा मोक्षकारिणी ॥ ६॥

सोमवासरसम्पूज्या सौम्यचित्तप्रसादिनी ।
मङ्गलवासरसंसेव्या सर्वकार्यसिद्धिकारिणी ॥ ७॥

बुधवासरसम्भाविता बुद्धिशक्तिप्रवर्धिनी ।
गुरुवासरसमाश्रिता श्रद्धाभक्तिपरितोषिणी ॥ ८॥

ॐ भृगुवासर पूजनीयाख्यै नमः । ॐ सर्वैश्वर्यप्रदायै नमः ।
ॐ शनिवासरोपासनीयाख्यै नमः । ॐ ग्रहदोषनिवारिणै नमः ॥ ९॥

ॐ भानुवासरदर्शनीयाख्यै नमः । ॐ नवरसास्वादकारिणै नमः ।
ॐ सर्वकालस्मरणीयाय्कै नमः । ॐ आत्मानन्दप्रदायिनै नमः ॥ १०॥

इति गीतसुधाविरचित अव्याहतस्फूर्तिदायिनि श्रीवासविकन्यकापरमेश्वरी देव्यासि सहस्रनामस्तोत्रं सम्पूर्णम् ॥ ॐ तत् सत् ।

रचनैः श्रीमति राजेश्वरिगोविन्दराज्
संस्थापकरुः ललितसुधा ज्ञानपीठ, बैङ्गलूरु वासवी सहस्रनामस्तोत्रम्
सुरेश गुप्त, संस्कृत विद्वान्, बैङ्गलूरु

Composed and proofread by Smt Rajeshwari Govindaraj
Audio rendered by Vidushi Smt Jyothi Aswathanarayan,
Smt Ashwini Srikanth, and Smt Nandini Vinay

*Shri Vasavi Devi Sahasranama Stotram 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*